This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

३४०

॥गणेशाय नमः॥ श्रीगुरुभ्यो नमः॥ मालिनो घनमाली मालिनो बलिमाली॥ मालिनो वनमाली मा
लिनोवतु माली॥१॥ पितृवचनमवनम्रं मेघपालं जगति जननिनीतिं शासितुं वशांतं॥ गजपतिकरु
रसार्द्रचित्तं रघुपतिमेकं सुभास्माहे सदारं॥२॥ राधिकाविनोदाख्यं काव्यं चिकीर्षुर्निर्विघ्नपरिसमाप्तिस
माप्तिकामो रामचंद्रकविः॥ परमेश्वरकर्तृकं स्वसंरक्षणं त्रासनरूपं मंगलमाचरति॥ नवमाली आ
पादलंबिनी माला वनमाला॥ तद्वान् जगदीश्वरो नोऽस्मान् ग्रंथकर्तृन् श्रोतृन् वा रसैस्तु अवतु रक्ष
तु॥ कीदृशः मालिनः मा लक्ष्मी सा लीना दुष्टहरणसंभावनया छिन्नीभूय वर्तमाना यस्मिन्॥ स तादृशः
पुनः कीदृशः वनमाली वने जले मालते शोभते स तादृशः अथवा वने भवने वनं इस समर॥ समुद्रशायित्वा
तूलशोभायोनिस्पर्धः॥ पुनः कीदृशः मालिनः मालाः पुष्पस्रजः ताः विद्यंते एषां ते मालिनः स्वामि
गोगोपाः तेषां इनः स्वामी तेषु इनः सूर्यः प्रकाशमानत्वेन सूर्य इति रूपकं वा॥ पुनः कीदृशः अवन
राली अवने नगसंरक्षणे न मालते शोभते स तादृशः॥ पुनः कीदृशः वने वृक्षसमुदाये मालते शो
भते स तादृशः इति वा॥ पुनः कीदृशः मालिनः मालं ते शोभते मालिनः इंद्रादयः तेषां इनः स्वामी पुनः
कीदृशः मालिमालः पुष्पस्रजः ता विद्यंते यस्य स तादृशः॥१॥ श्लोकः॥ विधुसुहृद्विरहान
लपीडिता विधुसुहृत्तरलानिलपीडिता॥ विधुसुहृद्वचना लिमपीडिता विधुसुहृत्सुगिरो किरदीडि
ता॥२॥ टीका॥ कामार्थमुपक्षिपति॥ विधोः सुहृत् तत्संरूपं वदनं यस्याः सा विधुसुहृदना॥ राधा आ
लीसखीं प्रति विधोः चंद्रस्य सुहृदस्तद्दुज्ज्वलाः शीतलावा शोभना इति यावत्॥ गिरो वाणीः अकिरत्॥
उच्चारयत् इत्यर्थः॥ कीदृशी ईडिता स्तुता पुनः कीदृशी अपीडिता न विद्यते पीडिता यस्याः सकाशात् सा
अपीडिते त्यर्थः॥ उत्तमे उत्तमं च स्यादिति यत्॥ यद्वा येन विधुना पीडिता स्वविरहेणेति भावः॥

Acc. No. - ~~H22~~ M-1683
Title - राधाविनोदकाव्य. (with Comm.)
Author - रामचन्द्र.
Date - ?
Sub - Potery.
folio - 5
Xerox - 10

KKSU LIBRARY RAMTEK 441 106 M-1683 Dist Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधुः सुधांशौ कर्पूरे हिसि के शे च राक्षसे इति केशव॥२॥
॥ विधुः सुधांशौ कर्पूरे हृषीके शे च राक्षसे इति केशवः ॥ विधुः सुधांशौ कर्पूरे हृषिके शे च राक्षसे इति केशवः ॥ विधुः सुधांशौ कर्पूरे हृषिके शे च राक्षसे इति केशवः
विधुः सुधांशौ कर्पूरे हृषिकेशे च राक्षसे इति केशव॥२॥
विधुः सुधांशौ कर्पूरे हृषिकेशे च राक्षसे इति केशव॥२॥

दृशं सदृशं विधो ॥ ४ ॥ टीका ॥ हे सखि सखि हिमकरः प्रसिद्धः शीतलकिरणः हिनिश्चयेन हि — — मध्येपि
मतां हिमतां शीतलतां मां अनुमा मुहिस्म नतनुतेततः ॥ तनुते शरीरकार्श्यं मनोदौर्बल्यं चेति द्वे तनुते मा
र्श्यद्भुमं मिस्य मे ॥ तनुते विस्तारयति यद्वा हिमकरः नतां नं स्त्री भूतां मतां नसे न ज्ञातां ममानु अहिम
तां उदस्ततां तनुते न स्मविधो श्वं दृस्य म सदृशं ऽस्तिनं ॥ कीदृशः अत्तनुतमामहसेन रंनः अतनुतेततः
तनुता चासौ रश्मलक्ष्मीश्च तयातनः व्याप्तः तनुतेन ततः अनुनेतश्चासौ न तुतेन श्चसतथा ॥ म
हसा वात्रस्तनलक्ष्मीनां श्वेसर्वः ॥ कीदृशः कुमुदानां अचेतनानां बंधुः अस्मदादीनां च अबंधुः
शत्रुः अतएव अबंधुरः असुंदरः ॥ यद्वा कुमुदानां बंधुरः सुंदरो बंधुः ॥ अपाजलानां अ
बंधुः रूपस्तं राति आदत्ते स तथा ॥ इदंविधो श्वं दृस्य किं सदृशं सदृशं उचितं उचितं ॥ यद्वा कीदृशी
मां सदृशं समान प्रियसमागमे मद्विरहे च तु नारूपादृक्रूपस्यास्तीति तया ॥ यद्वा ॥ दृशा ज्ञानेन सदि
तां सदृक् ॥ नाद क्रूज्ञाने ज्ञात शिशिपुरस्सरं ॥ यद्वो ततो विस्तृतः ॥ यद्वा ततस्तात ॥ कीदृशामिति व्या
ख्यायां ॥ ४ ॥ श्लोकः ॥ कमलिनी मलिनामलिनालिनाविचलता नवता [illegible] सुलतां सुमां ॥ विधु
तभां विधुतां विधुमानभिनैयनयोरनयोर्नयसारसैयोः ॥ ५ ॥ टीका ॥ कमलिनी मिति ॥ हे सखि
संदनयोः श्रेष्ठयोरनयोः नयनयोर्नेत्रयोः कमलिनी पद्मिनी नयसिप्राप्यसिका कान पसिनेति
प्रश्नः कः कीदृशी तासु विचलता चलता नचलेन अलिना अलिना भ्रमरेण भ्रमरेण मलिनीमलः रू
पं यस्यास्सादृशी पाठो तरे मलिनश्चासावलिश्च मलिनावलिस्तेन यालिनी पुनः कीदृशी विधु
भानुभिश्चंद्रकिरणैर्विधुतां कंपितां ॥ अतएव विधुता चंचलता ताभा दीप्तिर्यस्यास्तादृशीता विधु
धुतयामिति पाठे विधुतलक्ष्मी ॥ ५ ॥ श्लोकः ॥ सखि विभाति विभाताविभानसरसीसरसासरसा रसे ॥

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अलिकुलैर्विधुता विधुताधुता विनन मम्लुमुखी विमुखी स्थिता ॥६॥ टीका ॥ सरसीति ॥ हे सखि सरसी न
विभाति विभाति न शोभते ॥ यद्वा ॥ न विभाति न शोभति विभाति प्रतिभासते ॥ कीदृशी विगतो भावो यस्याः
सा विभाविनी विगमा न सरहिताभा यस्याः सा तादृशी यद्वा सरसी न विभाति ॥ कीदृशी विनापक्षिणं भा
२ भिः आति विभाविनी अतिविभा समानादीप्ति यस्याः सा लभा ॥ पुनः कीदृशी ॥ सरसा रसो गंधि रसो
हर्षे रसः स्वादे प्रकीर्तितः ॥ तेन सगंधा सा स्वादावा ॥ पुनः कीदृशी रसैर्जलैः सरसा परिपूर्णा पुनः
कीदृशी ॥ अलिकुलैः विधुता केचितु सरसं सहर्षं अस रंति सरसां सराः तादृशा ये सारसाः तैः सह
अलिकुलैर्विधुतेति व्याचक्षते ॥ पुनः कीदृशी ॥ विधुतानि कंपितानि आईषत् धुतानि अतएव आ
समंतात् विनमंति अब्जानि कमलान्येव मुखानि यस्याः सा तादृशी ॥ तत्र रूपकं विमुखी स्थिता
पाराङ्मुखी नायिकेयं सर्थः ॥ विधुनाधुतानि पाटे चंद्रेण भासिता विगत श्री कृते सर्थः ॥६॥ श्लोकः ॥
कुमुदिनी दयितो दयितो नितौ निजकरैः रकरैः दहति स्फुटं ॥ यदमुमेक पदे विपदे भ्रमो हृकचपुष्करिणी
हरिणीदृशाः ॥७॥ टीका ॥ यत् अयं कुमुदिनी दायित श्चंद्रः दयितो नितांतः दयितेन भर्त्रोज्झिताः रहिताः
करैः किरणैर्दहति ॥ कीदृशैः अकरैः ॥ अकरैः करो राजग्राह्यो भागः स नास्ति येषां तैः अग्राह्यैरित्यर्थः ॥
यत् यस्मात् कारणात् अयं विकचानि पुष्कराणि कमलानि यासु ताः विकचपुष्करिण्यः सरस्यस्ता
हरिणीदृशाः तासां विपदे अनर्थाय इति स्फुटं ॥ सूर्यं सा [illegible] क्षेण एकपदे युगपत् ॥ सरसीति कमला २
नां म्लानत्वात् तासां विजनकत्वं चंद्रस्येति स्फुटं सर्वप्रसिद्धमिति भावः ॥७॥ श्लोकः ॥ विधुरितो
धुरितो वनितादहनः विधुरयं जनितो जनितोषभृता प्रहतरश्मिगते श्मिगतेः क्षितिनीरवि मतिर्भ्रम
निभिमीलसा ॥८॥ टीका ॥ विधुरितानां विरहिणां वाधुरं दुःखं प्राप्ताः विधुरिता धुरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तादृशी: विनता: दहन् संतापयन् अयं विधु: जनित: जन्म न: सकाशात् जन्म प्रभृती सर्थ:॥
अंकभृत् कलंकी जनितेः इह अस्मिन् चंद्रे मरस्लिगते मम हृदये आलिगतेन यनाविषमे
सति आक्रमिनीकमाबिनी रविमातिहिमकरेप्यस्मिन्नुष्णकरस्तति यदुमंत्ती अतएवमति: पिरु
दकुसुमतीसा कसमाबिनीनि मिमीला निमीलितवती॥ अयंभाव: यद्वो हा लोके कमलिनी कम
लसंकोचं विदधाति तत्संतापक सोमस्मिन् रविबुध्या संतोषेणेवालिसंकोचमाचरति॥ ८॥
श्लोक:॥ मयत पन्नगपन्नगमंडलीकवलितोवलितोनुपनानिव:॥ अद्य मे गमदंगमदंगकंद
हृतियकृ मयं भ्रमयन्नयं॥ ९॥ टीका॥ मलयस्य मलयाद्रे: यदि चरणे ये नगा: वृक्षा: चंदना
इतियावत्॥ तेषु ये पन्नगा: सर्पास्तेषां मं–डल्या समूहेन कवलितो भक्षित: समूअयं वनानि
लः पवन: संबंधिवायु: जनितकेलि॥ वलित: कंबलातिबलती कामधे नूआयइ सर्थ:॥ यत्यस्मा
त् कारणात्॥ अयं निर्दयं यथास्यादेवं अंगानि मथ्नाती सीगमथ:॥ मन्मथ: स अंगेषु हस्तापादा
द्यवयवेषु यस्य तादृशं मदंगकं मच्छरीरं भ्रमयन् अयं दहति संतापयति॥ यद्वा अंगानि संबुद्धौ हे
सखि॥ अंगानि मथ्नाती संगमत अंगमथन कर्तीयं वायु: मदंगकं रहति सर्पकवले नं विनाज
नुष्कासीत्तस्यास्य वनवायो: कुतसंताप समि ति भाव:॥ ९॥ श्लोक:॥ अयिरसालयनिर्नवनी कुलाकुल
रनीरनवनीनवनीपवनीमती॥ अयि कुवालि कुलानिवै धति रहमामाहिमामहिमाहिमा॥ १०॥
टीका॥ अयिसखि रसालानां आम्राणां वनीमोप्रति अहिता शत्रु भूता दु:खदायिनी सर्थ:॥
कीदृशी वनं च तत्तनारस्य तन्नमाति प्राति ध्व टसंप्रापयति सा नवनीरनी: सारणीम सादृिपि
भाव:॥ पुन: कीदृशी नवानां नूतनानां नीपानां कदंबानां वन्यामातिं सदृश्ह अनेयती अ

६

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रक्षमाणां तातिरस्कारिणी सखी॥ पुनः कीदृशी॥ अलिकुलानां भ्रमरसमूहानां अलिकुलानां स
खिसमूहानां यानि अलिकुलानि सखीसमूहास्तैराकुला व्याप्ता॥ पुनः कीदृशी॥ महिम्नामह
सेन व्यस्तबाहुलेन असमंतात् हिमा शीतला महिमा हिमा॥ १०॥ श्लोकः॥ बकुलमाकुलमा
लिपरागितमधुपरागपरागपरा॥ लिभिः॥ विशदशारदशारदशारदं राशिकलंककलंककलंकक
३ लंकितं॥ ११॥ टीका॥ हे स्याली त्वं तत बकुलं शारदं तत् प्रति फुल्लं सभ्या गच्छे सखी॥ कीदृशी॥ ब
कुलं॥ धूलयः परागाः यस्मिन् तं तथा पुनः कीदृशं मधुमकरंदः परागाः पुष्पधूलयः वत
अपराः अंगेषु रक्तेषु पराः ते तादृशाः एतादृशा मे अलयो भ्रमरास्तैः आकुलं व्याकुलं व्या
प्तमिति यावत्॥ पाठांतरे॥ परापतंतः मधु पिबंति तादृशाः रागेषु पराः गुञ्जत इति यावत्॥ तादृशाः
अंगेषु रक्तेषु पराये अलयस्तैराकुलमिसखी॥ पुनः कीदृशं॥ विशदो निर्मलो यः शारदः
शारदभवः अर्धचंद्र इति यावत् सशारंभावप्रधाननिर्देशेन शबलसंददाति स तादृशो य
स्मिन् स तादृशः त्वं सुखं भरं अतिशयेन ददाति स शारदः॥ विशदशारदशारदश्चासौ शा
रदश्च स तादृक् तं॥ पुनः कीदृशं॥ कलंकस्य चंद्रलांछनस्य कलंकेन संबंधेनेव कलंकितं श्याम
लमिसखी॥ ११॥ श्लोकः॥ नवमशोकमशोकमशोकमशोककरे सुरभितारभितालिरतारतं॥ ३
सखि समाश्रयमाश्रयं कमलिनीमलिनीपरवागतः॥ १२॥ टीका॥ एवमुक्ता सखी राधां प्रति
वदति॥ अशोकदेशोक— तिरखंडयति सा शोकदानतादृशी॥ अस्त्रशोकदातस्याः संबुद्धौ हे सखि
लैन वंदतनं अशोकेन विधते शोकोयस्मिन् तादृशास्तं तथा अशोकं तन्नामकं वृक्षं समा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ॥ तन्निकटवर्तिनी भवेदिशमतिभावः॥ कीदृशं॥ अशोकं सुरभितया सौरभेण रभितरमसमृका
वेगवंतो हर्षयुक्ता यायेअवयः तेषां रतेन क्रीडनेन आईषत् रतं यच तं तथा॥ रभरभस इति धारे
तप्रसमांत स्य रभिता इति रूपं॥ रभसो वेगहर्षयोरिति विश्वः॥ यद्वा सुरभिताः सौरभयुक्ताः आ
समंतात् रस्याग्रे भ्रमभासंजाता येषां ते तथा ये अवयः तद्वतेनारतं॥ माइति मां श्रय आश्रिता
भवमा आश्रयः मायाः लक्ष्म्याः आश्रयः लक्ष्मीपतिः आगतः आगतप्रायः कः का इव अलिनीपः फ
मालिनी। इव॥ आलिनी भ्रमरी पाति स्तताहृवाः॥ १२॥ श्लोकः॥ सखि हिता समता सि मता समं
नवमशोकमशोकमशोकदं॥ तदिह मामव मामय मा ममां ब्रज हरिं नवनीरदनीरदं॥ १३॥
टीका॥ ततो राधा प्राह॥ हे सखि वं हिता मङ्गलकारिणी असि हिता मता असि। हितसेन अभि
मता अस्मी सधर्मः॥ मतासि। मता॥ समामिति पाठे॥ मतं असेः खट्स्येन मतं यस्याः सा परिच्छेद
के श्री सधर्मः॥ नवं अशोकं अशोकस्य पल्लवपुष्पादि॥ अशोकदं शोकाभावदं इति अशोकं
न विद्यते शोको विचारो विषयो यत्र तादृशं॥ इति मां अस्त्र प्रवीचि॥ काक्का प्रश्नः पर्यवस्य
ति॥ तत इहास्मिन् विषये मां अव रक्ष अवमया न्यनतया अमम मां सेति संबंधगन्याम
किंचनास्मि सम्मं॥ कीदृशं हरिं नवो नीरं जलं ददाति स तादृशो नीरदो मेघस्तं तथा अजे वज
लद नीलमसि सम्मं॥ १३॥ श्लोकः॥ इति सखी गदिता गदिता हिता नवनरायवराय ययाय वा॥
इति गिरं कुजया कलया अलाप कुमिशामहुतामहुता हुता॥ १४॥ टीका॥ इति पूर्वोक्तप्रकारे स रव्या
राधया सा हिता उक्ताः गतो रोगः पीडा व क्रोध इति यावत्॥ संजातो यस्याः सा गदिता पी उक्ता॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधुधमा रिरोगेचगदः शस्त्रांतरेगदेतिविश्वः ॥ तादृशी सती ॥ कया ॥ चातुर्विशेषेण इतिव
दुपमानप्रमाणेन गिरं अदृतादृतवती ॥ कीदृशीं गिरं अवसाय अधमा यवराश्रेष्ठा यथा अ
नवनेन अवनं रक्षणं तदभावे न यावकरूपां ॥ कीदृशी कलया कांसा कलागंभीरा तदीत
रामवती सर्थाः ॥ पुनः कीदृशी पटुगिरायाः कुर्वोक्तायाः समर्था वाच्या मृदुतया लोमव
तमा अमृदुतया कठोरतया चटुता हुना दुःखिता अवनराये तिपाठे कलात नाम्नी स
रवी इति प्रौक्ते प्रकारेण सख्यो राधया गदिता सति ॥ अनघः पुरातनयोनरः पुरुषः पुराण
पुरुषो हरिस्तस्मै इति वक्ष्यमाणां गिरं पटुमध्यां स्पात तथा आदृतरतवती ॥ कया गिरा कथं
भूतया गिरा ॥ मृदुता मार्दवं अमृदुता कठोरत्वं च ताभ्यां हुनो तेसा ॥ मृदुतामृदुतादुत्त
या ॥ कीदृशाय ॥ वरश्रासाविषभश्चवरायः तेन वरः श्रेष्ठस्तस्मै वा शब्द उपमा नाथमानिते व ॥ १४ ॥
श्लोकः ॥ मलयजं तनुते तनुतेतनौ सहचरीनलिनी नलिनीदले ॥ सुनयनाचलदं चलदं
चसा तदपि सीदति सीदति बंधुता ॥ १५ ॥ किमु बाने साह ॥ हे सहचारि सखी राधा तनौ
शरीरे अतनु स्वल्पं मलयजं तनुते ॥ विस्तारयति नलिनी तन्नाम्नी सखी नलिनीदलं तनु
ते सा सनयनात नाम्नी सखी अनलं संतापं धाति खंडयति सततं भातं नलदं उशीरं तनुते ॥ तद
पि तथापि सा सीदति दुःखिता भवति ॥ बंधुता बंधुसमूह भ्र सीदति दुःखिता भवति
सीदति सीदती सा दृश्वी प्सा ॥ १५ ॥ श्लोकः ॥ समुदिते मुदिते मुदितेसणे हिमकरे

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मकरेमकरेश्रुतौ॥ पिकरवे वरवेपरवेति साहरिणलांछनलांछनलांछना॥१६॥टीका॥
पुनः किमुवाचेसाह॥ हे वरदेः लक्ष्मीतस्या वरलक्ष्मीकोतस्या राधोहिमकरेचंद्रे समुदितेसा॥
सी अमुदिता अहृष्टासती रक्षणे नेत्रे अमुदिते अहृष्टे मुदिते इतियावत्॥ एतत्प्राप्नोति
चात्राब्दभ्यां घेचरस्सपरंपिकरवेकोकिलस्वरे समुदितेसती श्रुती कर्णे अश्रुतेएति॥ अंगु
ल्यादिनादधातीतिभावः॥ कीदृशे हिमकरे नकरेमकरे नस्य मकरस्वामी नोमकरध्वजस्य
कारके तद्बुधकइत्यर्थः॥ मकराणां इत्यस्यादोनाथस्यमकं सुखं राति स तथा तस्यापि
जलधेःद्धिकरइत्यर्थः॥ कीदृशी अपमारक्षेतिपरः शब्दो यस्याः सा तथापुनः कीदृशी हरि
ण लांछनश्चंद्रः तस्य यल्लांछनं चिन्हं पांडु संतत्लांछनं यस्याःशिवो लांछनं यस्याः सा
तथाशिवाद्विवेतिजगतीत्यर्थः॥१६॥ श्लोकः॥ नसहते सहतेसहते सरतित्वविथोगवियो
गमयोगहर॥ स्मरदितां तरुणींतरुणीमणीकिरतुनाम वनेनवयानिविजं॥१७॥टीका॥
पुनःकिमुवाचेसाह॥ हे अयोगहर अयसो लोहस्य गंयः अगःपर्वतस्तद्वत् हृदयं यस्य स त
थाहेलोहपर्वतहृदयकठोरांतःकरण सातेसहसरी नवसहचरी राधा तवविथोगंविहंगम
रजस्य योगं अन्यत्र मनसाधती कृतं नसहते सहते॥ आहरे विसा॥ यद्दृत्तवविथोगं नस
हते अयोगं अत्यंतयोगं अस्याविश्लेषात्वयोगं वा तथा॥ अयोगं हरतीतितत्अयोगहरतवि
योगापहारकं से योगजनकमितियावत्॥ सहते भवा निसध्याहार्यंतेथा चभवान्रतांतर

9

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञौ सपादिह किरतु सजनतुयस्यो त्रो भरमसतां परिहर्तीति सर्थः॥ तां सरणां किरतु मा मद्दानिकं क्षदेन
नेयवी जनं नूतन नीवौनातं वर्तमानमितियावत्॥ मणिं किरतु॥ नवनीं विमोक्षं विदधातिस
र्थः॥ कीदृशं मणिं नवं अघयावद्भुतो॥१७॥ श्लोकः॥ अथतया कलया कलया सुभां यन
अदामज दामजदीप्तिमान्॥ हरिरगात मगमगा सा मुदमती अमती च दृशास्थितं॥ १८॥ टीका
अथे सनंतरं च न जनां कमलानां दामपंक्तिस्तस्याः आत्तंयत् दाममालांतःआयाद्दीप्ति स्तद्यून् सतया हरिः तंयाकल
याते नो मम्या सख्या सह सुफां सुंदरी राधां प्रति अगात्॥ कीदृशी॥ कंबु रखकांति साकला तया सा राधा तं अग
तं अगो गोवर्द्धनः स अतो येन तं तथा दृशो स्थितं दृष्टिगोचरं संतं अतीव मुदं अगात्॥ कीदृशी अती वं अतिसौ
ख्यमिसर्थः॥१८॥ श्लोकः॥ रामचंद्रकविना कविनादः पुरुषोत्तमसुतेन सुतेन॥ राधिका हृदयत्रो करमासीद्रा
धिका हृदयत्रो करमासीत्॥१९॥ टीका॥ राधिकायाः हृदयत्रो कं घातिखंडमति ततो हृदयत्रो आदरकां सकवि
नापंडितेन रामचंद्रकविना आसीत्॥ तेनो सा हितमिसर्थः॥ कीदृशेन पुरुषोत्तमस्य यः सुतो जनार्दन सा
स्य इनेन श्रेष्ठेन सुतेन श्रेष्ठपुत्रेणेसर्थः॥ कीदृशं अदः आरासमीपे सूतमा नमिसर्थः॥ राधिका हृदये
मस्य स तथा श्री कृष्ण इतियावत्॥ तस्या यत्रोकस्तदप्राप्तिनिबंधनं दुःखं तत्तु घातिखंडयति ततो हृदयत्रं॥
॥१९॥ शुकदेवसमाख्यस्य पंडितश्रीशिरोमणेः तनयस्य निदेन भद्दनारायणो सुधी॥ राधाविनोदकाव्य
स्य व्याख्यानं स्वधियाऽधात्॥ २०॥ इति श्री शुकदेवतनयेन नारायणभट्टेन कृता राधाविनोदका ५
व्यटीका समाप्ता॥ ५॥ श्रावण शुद्ध द्वितीयेस समाप्तः शुभं भवतु॥ राम कृष्ण शिवराम कृष्ण राम॥

KKSU LIBRARY RAMTEK 441 106 M-1683 Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.09.20 11:14
,TRANSFERRED=2020/09/23 at 11:16:43
,PAGES=10
,TYPE=STD
,NAME=S0003663
,Book Name=M-1683-RADHAVINOD KAVYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection